## अष्टमः पाठः

# ग्राम्य जीवनम्

ग्राम्य जीवनम् सुव्यवस्थितम भवति ।ग्रामे प्रायेण सर्वे स्वस्थः भवन्ति । वनेषु नगरेषु च तथा जीवनम न भवति ।वस्तुतः ग्रामः वननगरयोः मध्ये सन्ति ।ग्रामीणाः जनाः प्रायेण कृषी वलाः भवन्ति ते च प्रातः कालात सायं यावत् क्षेत्रेषु कर्म कुर्वन्ति .क्षेत्राणि सेक्तुं वारिणा पूर्णाः कुल्याः भवन्ति .कृषकाः क्षेत्राणि फलेन कर्षन्ति .कुल्या जलेन तानि सिंचति तत्र बीजानि वपन्ति च . ग्रामान परितः शस्यश्यामला धरित्री राजते .परिश्रम शीलः ग्रामीणः धान्यादिकम उत्पादयन्ति .वैज्ञानिकोपकरणानाम साहाय्येन इदानीम् कृषि व्यव्सायः लाभप्रदः सञ्जातः .ग्राम पथिकानां गोपालानां च संगीतेन हृदयं प्रसन्नम् भवति .

वृक्षाः निःस्वार्थमेव फलम् छायां च प्रयच्छन्ति .ग्रामे शुकः -कपोत -मयूर -कोकिलादयः पक्षिणः कूजन्ति .अश्व -गो -महिष-मेषादयः पशवः च चरन्ति .ग्रामेषु मनोरञ्जनं अल्पव्ययसाध्यम भवति .धूल धूसरिताः बालकाः विविधाम क्रीड़ां कुर्वन्ति .जीवन रक्षणार्थम् अत्यन्तमुपयोगिनः वायु जलाधिकः ग्रामेषु प्रचुरं यथा लभ्यन्ते तथा न नगरेषु .ग्राम्य जीवनं सदाचार सम्पन्नम धार्मिकम् च भवति .ग्राम वासिनां मनांसि निर्मलानि भवन्ति . तत्रत्य् वातावरणं स्वच्छं भवति . प्राचीन काले ग्रामेषु तथा विधं शिक्षालय ,चिकित्सालयादीनां सौविध्यं नासीत् यथा अद्यास्ति ,तथापि अधुना ग्रामेषु सकलानि साधनानि यदि उप्लब्धानि भवेयुः तर्हि ग्राम्यजीवनं इतोऽपि सुकरं सुखकरं च भविष्यति तदर्थं ग्राम -निवासिभिः सम्भूय प्रयत्नः विधेयः

## शब्दार्थः

**कृषीवलाः** = किसान।**क्षेत्रेषु** = खेतों में। **वारिणा** = जल से। **कुल्या** = नहर। **कर्षन्ति** = जोतते हैं। **वपन्ति** = बोते हैं। **परितः** = चारों ओर। **प्रयच्छन्तः** = प्रदान करते हुए।

**शस्यश्यामला** = फसलां से हरित। **कूजन्ति** = कूजते हैं। **सम्भूय** = एक होकर। **सौविध्यम्** = सुविधा। **सुकरम् =** सरल।**राजते** = सुशोभित होती है।

अभ्यास

**1. उच्चारणं कुरुत पुस्तिकायां च लिखत -**

सुव्यवस्थितम् साहाय्येन अल्पव्ययसाध्यम्

निःस्वार्थमेव जीवनरक्षणार्थम् सौविध्यम्।

**2. एकपदेन उत्तरत -**

(क) कृषकाः क्षेत्राणि केन कर्षन्ति ?

(ख) निःस्वार्थमेव फलं छायाञ्च  के प्रयच्छन्ति ?

(ग) ग्रामेषु अल्पव्ययसाध्यं किं भवति ?

(घ) ग्रामनिवासिभिः सम्भूय किं विधेयम् ?

**3. पूर्णवाक्येन उत्तरत -**

(क) ग्राम्यजीवनं कीदृशं भवति ?

(ख) क्षेत्रेषु जनाः कदा कार्यं कुर्वन्ति ?

(ग) प्राचीनकाले ग्रामेषु केषां सौविध्यं नासीत् ?

(घ) ग्राम्यजीवनं सुकरं कदा भविष्यति ?

**4.मञ्जूषातः  क्रियापदानि चित्वा वाक्यानि पूरयत-**

उत्पादयन्ति ,  कर्षन्ति ,  कूजन्ति , भवति , लभ्यन्ते

(क) ग्राम्यजीवनं सुव्यवस्थितम् ......................।

(ख) कृषकाः क्षेत्राणि हलेन ..............................।

(ग) ग्रामे शुक-कपोत-मयूर-कोकिलादयः पक्षिणः......................।

(घ) परिश्रमशीलाः ग्रामीणाः धान्यादिकम्......................।

(ङ) वायुजलादिकाः ग्रामेषु प्रचुरं.....................।

**5. संस्कृतभाषायाम् अनुवादं कुरुत -**

(क) गाँव में लोग प्रायः स्वस्थ होते हैं। (ख) गाँव कृषिप्रधान होता है।

(ग) किसान खेत की जुताई करता है। (घ) किसान अन्न उपजाता है।

**6. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत -**

(क) ग्रामे प्रायेण सर्वे स्वस्थाः भवन्ति।

(ख) ग्रामं परितः शस्यश्यामला धरित्री राजते।

(ग) धूिलधूसरिताः बालकाः विविधां क्रीडां कुर्वन्ति।

(घ) ग्रामवासिनां मनांसि निर्मलानि भवन्ति।

**7. शुद्धकथनस्य समक्षम् 'आम्' अशुद्धकथनस्य समक्षम् 'न' इति लिखत -**

(क) ग्रामपथिकानां गोपालानां सङ्गीतेन हृदयं प्रसन्नं भवति। (ख) वैज्ञानिकोपकरणानां साहाय्येन कृषिव्यापारः हानिकरः सञ्जातः। (ग) ग्राम्यजीवनं सदाचार-सम्पन्नं धार्मिकञ्च भवति। (घ) विकासाय ग्रामवासिभिः सम्भूय प्रयत्नः न विधेयः।

**<u>शिक्षण-सङ्केतः</u>**

*ग्राम्यजीवनस्य इतोऽपि सुखकरं सुकरं च निर्मातुं किं किं करणीयमिति लेखयत।*

*पशवः रक्षणीया इति चर्चा कारयत।*

**आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।**